# श्रीमद्भागवते काव्यतत्त्वविमर्शः

## सारांशिका

संस्कृतभाषा देववाणीत्यभिधानेन प्रसिद्धमुपगतास्ति लोके । भाषैषा किमर्थमभिधीयते देववाणीति । देवैः व्यवह्रियमाणत्वात् संस्कृतं देववाणीत्युच्यत इति धारणा वर्तते । ब्रह्मविष्णुमहेश्वरादयः प्रमुखाः देवाः अपरे चान्ये देवाः संस्कृतेनैव संलपन्ति । तस्मादेव व्यवहारप्रयुक्ता एषा देववाणीति नाम्ना ख्याता भुवि ।

संस्कृतवाङ्मये पुराणानामेकं विशिष्टं स्थानमस्ति तथा तेषां महन्महत्त्वमपि विद्यते, सर्वसाधारणजनेषु सभ्यता–संस्कृत्योः प्रचारः प्रसारश्च पुराणानां प्रधानं कार्यमस्ति । पाश्चात्या इतिहासवेत्तारोऽपि पुराणानि भारतीयानां सांस्कृतिकनिधिः मन्यते ।

संस्कृतवाङ्मये नैकानि पुराणानि तत्रापि महापुराणानां वैशिष्ट्यं सर्वत्र दरीदृश्यते । पुराणेष्वपि श्रीमद्भागवतस्य महत्त्वं, वैशिष्ट्यं लोकोपकारिकत्वञ्च जगति प्रसिद्धमिति ।

श्रीमद्भागवतशब्दस्य व्युत्पत्तिः

श्रीमद्भागवतं हि धार्मिकाध्यात्मिकवाङ्मये एकं समुज्ज्वलं ग्रन्थरत्नमस्ति । भारतीयानामास्तिकजनानां न केवलं हृदयेषु, न केवलं सर्वश्रेष्ठपुराणरूपेण, प्रत्युत श्रीभगवद्विग्रहरूपेणास्मिनास्था विद्यते ।

श्रीमद्शब्दस्य प्रयोग अस्मिन्नेव पुराणे दृश्यते । श्रीमद्शब्दस्य व्याख्या सम्यक्तया भावार्थदीपिकायां वंशीधरमहाभागैः प्रतिपादिता –

श्रीमद्भागवते ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्" इति श्रुतेर्वेदाभ्यास एव श्रीः सा विद्यते सा विद्यतेऽस्यास्मिन्वेति श्रीमान्"

अत एव श्रीमद्शब्दस्य प्रयोग अस्मिन्नेव पुराणे दृश्यते । भागवतशब्दस्य प्रयोगः संज्ञा विशेषणश्च अर्थद्वयं प्रयुक्तं जातम् श्रीमद्भागवते । यथा – भगवता प्रोक्तम्[१] । भगवतोदितम्[२] । यतोहि श्रीमद्भागवतमाहात्म्ये व्यासेनोक्तम् –

तेनेयं वाङ्मयीमूर्तिः प्रत्यक्षा वर्तते हरिः ।[३]

अपि च – साक्षात् भगवता प्रोक्तं इति भागवतम् । इति निरुक्त्या योगरूढोऽयं शब्दः न तु यौगिकः । इति दीपिनीव्याख्यायां श्रीराधारमणगोस्वामिनोक्तम् । द्वितीयकारणमस्ति यत्र षड्विधर्मैश्वर्यं यस्मिन् विद्यते स एव श्रीकृष्णः । अपि च यस्मिन् श्रीकृष्णोपासना वर्णिता तदेव भागवतम् । कारणादण्, श्रीमांश्सचासौ भागवतस्य चेति श्रीमद्भागतस्य तस्मिंस्तथा श्रीमद्भागवतम् । एतादृशी व्याख्या विविधटीकोपेतं श्रीमद्भागवतं महापुराणनामके पुस्तके प्राप्यते । श्रीमद्भागवते सर्वा विद्याः संनिहिताः सन्ति । तेन कारणेन "विद्यावतां भागवते परीक्षे"ति प्रसिद्धिः भूता ।

श्रीमद्भागवते धर्मार्थकाममोक्षसम्बन्धीनि तत्त्वानि संनिहितानि सन्ति । यथा सर्वेषां शास्त्राणां तत्त्वान्यत्र तथैव काव्यतत्त्वान्यप्यत्र निगूढानीति । अत एव श्रीमद्भागवते काव्यतत्त्वविमर्शः ।

इदं श्रीमद्भागवतमहापुराणं भागवततत्त्वं परमात्मतत्त्वं भगवत्तत्त्वं भक्तितत्त्वञ्च एतेषां विषयाणां विवेचनं विवेचयति । समान्यजनेभ्यः

---

[1] श्रीमद्भागवतमहापुराणम् २/९/४३

[2] श्रीमद्भागवतमहापुराणम् २/७/५१

[3] श्रीमद्भागवतमहापुराणस्य माहात्म्ये ४/६२

पुरुषार्थचतुष्ट्यं प्रददातीदं पुराणमिति । अत एव पुराणानां लक्षणं पुराणानां रहस्यं शास्त्राणामौचित्यं मानवानामानन्दञ्चानेन श्रीमद्भागवतेन प्राप्यते ।

भारते दशमशताब्दीपश्चात् सर्वेषां सम्प्रदायाचार्याणां मते श्रीमद्भागवतमाधारग्रन्थरूपेण भक्तिशास्त्ररूपेण च सुशोभितम् । अत्र शङ्कराचार्यतः आरभ्य रामानुजनिम्बार्कमध्वचैतन्यवल्लभादिसम्प्रदायाणां ये ये विद्वांसः अभूवन् ते सर्वे श्रीमद्भागवतं भक्तिशास्त्ररूपेण स्वीकृतवन्तः ॥

एतदतिरिक्तमपि श्रीमद्भागवतस्य ग्रन्थस्य यदि सिंहावलोकनं क्रियते तदा श्रीमद्भागवतस्योपक्रमसंहारपर्यन्तं अध्ययनेन परिज्ञायते यत् मनुष्याणां ज्ञानवर्त्मदर्शनं सांख्ययोगादिदर्शनं भक्तिज्ञानविरागादिदर्शनं वेदपुराणधर्मशास्त्राणां काव्यात्मकरूपेण निदर्शनमत्रोपलब्धं भवति । एतद्विचिन्त्यैव मया “श्रीमद्भागवते काव्यतत्त्वविमर्शः” इति विषयमवलम्ब्यानुसन्धानकार्यं चिन्तितम् । अमुं रहस्यं किं वैशिष्ट्यं कोपयोगिता चेति । इत्याधारीकृत्यानुसन्धानकार्यं प्रारब्धम् ।

अस्मिन् शोधकार्ये “श्रीमद्भागवते काव्यतत्त्वविमर्शः”शीर्षकरूपेण स्वीकृतोऽयं शोधविषयः पञ्चष्वध्यायेषु विभक्तः । अत्र पुराणविमर्शः, भागवतविमर्शः, भागवते काव्यतत्त्वविमर्शः, काव्यतत्त्वसमीक्षा चेत्याधारभूमिं स्वीकृत्य विषयस्योपस्थापनं कृतम् । अध्यायानुसारेण विषयविवेचनात् पूर्वमालोच्य ग्रन्थस्य विषये किञ्चिदत्र मयोपस्थाप्यते ।

## अनुसन्धानविषयवैशिष्ट्यम्

श्रीमद्भागवतं धार्मिकाध्यात्मिकवाङ्मयस्य सर्वश्रेष्ठं सर्वोत्कृष्टं समुज्ज्वलग्रन्थरत्नमस्त्येव। ग्रन्थोऽयं भक्तिज्ञानवैराग्यानामानन्दप्रदाता पवित्रतमा त्रिवेणी निगद्यते –

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र–
मात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥[१]

आस्तिकजनानां हृदयपटलेषु न केवलं सर्वश्रेष्ठपुराणत्वरूपेण अपितु सक्षात्लीलापुरुषोत्तमस्य अकारणकरुणावरुणालयस्य श्रीमद्भगवद्विग्रहरूपेण ग्रन्थेऽस्मिनास्था विद्यमानास्ति । वेदरूपीकल्पवृक्षस्य परमानन्दरसमयं मधुरफलमिदं श्रीमद्भागवतं जीवानां कल्याणार्थाय, अमलात्मनानां ज्ञानीनाञ्च कृते परमहंसश्रीमतः शुकदेवस्य मुखात् निःसृत्य धरायामस्यामागतमिति ।

अष्टादशपुराणेषु श्रीमद्भागवतपुराणं महापुराणस्य संज्ञां लभते । ग्रन्थेऽस्मिन् पुराणस्यास्य महाभागवतमनेन शब्देन व्यवह्रियते –

स तं महाभागवतं व्रजन्तं कौरवर्षभः ।[२]

महर्षिव्यासेन विरचितं श्रीमद्भागवतमहापुराणं भगवद्वन्नित्यसनातनमस्ति । भागवतशब्दस्य व्युत्पत्तिः सामान्यतया महर्षिपाणिनेः “तस्येदं” इति सूत्रेण भगवच्छब्दे अण् प्रत्ययकृते सति भागवतशब्दस्य निष्पत्तिर्जाता । षड्भगेन युक्तः स भगवान् अस्य भगवतः

---

1 श्रीमद्भागवतमहापुराणम् २/३/१२

2 श्रीमद्भागवतमहापुराणम् ३/४/२४

लीलायाः वर्णनं यस्मिन् ग्रन्थे प्राप्यते तदेव भागवतमिति नाम्ना प्रसिद्धम् । दशलक्षणसमन्वितभूतत्त्वादेवास्य ग्रन्थस्य संज्ञा महापुराणमिति प्रसिद्धम् । द्वादशस्कन्धसमन्वितं श्रीमद्भागवतमहापुराणं पञ्चत्रिंशतशतत्रयमध्यायैः समलङ्कृतम् अष्टादशसहस्रात्मकश्लोकैश्च सुसज्जितम् ।

श्रीमद्भागवते विविधविषयसन्दर्भाः

श्रीमद्भागवतमहापुराणं श्रीकृष्णलीलायाः सर्वोत्कृष्टलोकविश्रुतः सन्दर्भग्रन्थोऽस्ति । ग्रन्थेऽस्मिन् प्रेमभक्तिज्ञानादीनां त्रिवेणी प्रवाहमानास्ति । श्रीमद्भागवते न केवलं भक्तिज्ञानतत्त्वानां निरूपणमस्ति अपितु काव्यदर्शनतथ्यानामद्वैततत्त्वानाञ्च विशद्वर्णनं समजायत । दार्शनिकतत्त्वानां सांख्य–योग–वैशेषिक–अद्वैततत्त्वानां काव्यतत्त्वानां षड्ङ्गानां च वर्णनं प्रमुखरूपेणात्र सम्प्राप्यते । वस्तुतः श्रीमद्भागवतं वेदवत् शब्दप्रधानम्, पुराणवत् अर्थप्रधानम्, काव्यवत् रसप्रधानञ्च महाग्रन्थोऽस्ति ।

सांख्यान्तर्गते प्रकृतिपुरुषादितत्त्वानां वर्णनमुपलब्धम् । सृष्टिप्रक्रियायां महद्प्रकृति – पुरुष – तन्मात्रा – कर्मेन्द्रिय – ज्ञानेन्द्रियमनसां वर्णनं समुपलब्धम् । भागवते धर्मशास्त्रादिविषयमपि सम्यक्तया निर्दिष्टमत्र ।

अनेन प्रकारेण श्रीमद्भागवतं ज्ञानविज्ञानशास्त्रेतिहास–कवित्वकल्पनाभिः समलङ्कृतमहनीयग्रन्थरत्नमस्ति ।

श्रीमद्भागवते धर्मार्थकाममोक्षसम्बन्धीनि तत्त्वानि संनिहितानि सन्ति । यथा सर्वेषां शास्त्राणां तत्त्वानि काव्यतत्त्वान्यप्यत्र वर्णनं समुपलब्धम् ।

तत्र वेदवेदाङ्गानां दर्शनानां विविधशास्त्राणां काव्यशास्त्राणां विविधतत्त्वानाञ्च रहस्यं तत्त्वं चोपलभ्यते । यतोहि श्रीमद्भागवते विविधानि

काव्यतत्त्वान्यपि समुपलब्धानि सन्ति इति मनसि सञ्चिन्त्यैव मया "श्रीमद्भागवते काव्यतत्त्वविमर्शः" इति विषयमवलम्ब्य शोधकार्यं प्रारब्धं कृतम् । शोधविषयोऽयं पञ्चस्वध्यायेषु विभक्तः। तद्यथा –

प्रथमेहि प्रस्तावना विद्यते तत्र विषयप्रवेशः । श्रीमद्भागवतस्य महत्त्वमित्यादिकं वर्तते ।

प्रथमोऽध्यायः – अयमध्यायः पुराणविमर्शात्मको वर्तते ।

अस्मिन्नध्याये त्रय अंशा वर्तन्ते । ते च निम्नलिखिताः –

पुराणवाङ्मयस्य वैशिष्ट्यम् ।

महापुराणेषु भागवतम् ।

श्रीमद्भागवतस्य वर्ण्यविषयाः ।

पुराणवाङ्मयस्य वैशिष्ट्यम् – अत्र संस्कृतभाषायाः महत्त्वं पुराणशब्दस्यव्युत्पत्तिलभ्यरर्थश्च तथा इतिहासशब्दस्यव्युत्पतिः, पुराणानां प्राचीनत्वं, वेदपुराणयोः सम्बन्धः, पुराणानां भाषाशैली कथानकञ्च सम्यक्तया प्रतिपादितम् । तद्रहस्यं वैशिष्ट्यं महत्त्वञ्च वर्णितम् ।

महापुराणेषु भागवतम् – अत्र महापुराणस्य परिभाषा, महापुराणेषु श्रीमद्भगवतस्य महापुराणत्वमण्डनम् अत्र निरूपितम् ।

श्रीमद्भगवतस्य वर्ण्यविषयाः – प्रथमेहि श्रीमद्भागवतमहापुराणस्य परिचयः प्रदत्तः । श्रीमद्भागवतस्य लक्षणदृष्ट्यावैशिष्ट्यं महत्त्वञ्च प्रतिपादितम् । श्रीमद्भागवतस्य प्रथमस्कन्धतः द्वादशस्कन्धपर्यन्तं ये ये विषयाः समुपलब्धाः सन्ति, तेषां विषयाणां वर्णनं साङ्केतिकरूपेण निर्दिष्टमत्र ।

द्वितीयोऽध्यायः –भागवतविमर्शात्मको वर्तते । अत्रापि अंशत्रयमस्ति ।

श्रीमद्भागवतस्य शास्त्रीयं वैशिष्ट्यम् ।

श्रीमद्भागवते आध्यात्मिकनिदर्शनम् ।

श्रीमद्भागवतस्य तात्विकरहस्यम् ।

श्रीमद्भागवतस्य शास्त्रीयं वैशिष्ट्यम् – श्रीमद्भागवते विविधशास्त्राणां सन्दर्भाः वेदोपवेदानां षड्ङ्गानां शिक्षानिरुक्तकल्पछन्दव्याकरणज्योतिषादीनां शास्त्राणां च वर्णनं समुपलब्धम् ।

श्रीमद्भागवते आध्यात्मिकनिदर्शनम् श्रीमद्भागवते दार्शनिकं तत्त्वमपि अन्यूनमिति । अत्राध्यात्मिकदृष्ट्या निदर्शितम् ।

श्रीमद्भागवतस्य तात्विकरहस्यम् – श्रीमद्भगवतस्य भगवत्तत्त्वरहस्यं उपनिबद्धम् । ब्रह्ममायाजीवादीनां वर्णनमत्र प्रस्तुतं कृतमिति ।

तृतीयोऽध्यायः –काव्यविमर्शात्मकोध्यायः । अस्मिन्नध्याये द्वौ अंशौ वर्तेते ।

(१) काव्यतत्त्वनिरूपणम् ।

(२) काव्यतत्त्वविषये विभिन्नाचार्याणां मतम् ।

काव्यतत्त्वनिरूपणम् – काव्यस्य व्युत्पत्तिः उद्भवो विकासश्च इत्यादीनां वर्णनं कृतम् । संस्कृतसाहित्ये काव्यशास्त्रं, काव्यशास्त्रस्य कालविभाजनं काव्यतत्त्वानां साङ्गोपाङ्गवर्णनं, काव्यस्य विभिन्नाचार्याणां मते काव्यलक्षणं, काव्यप्रयोजनं काव्यस्य हेत्वात्यादिकं च वर्णनं प्रस्तुतम् ।

काव्यतत्त्वविषये विभिन्नाचार्याणां मतम् – काव्यतत्त्वविषये ये सम्प्रदायाः प्रसिद्धाः, तेषां सम्प्रदायानां रसतः औचित्यपर्यन्तं समेषां वर्णनमत्र प्रस्तुतमिति ।

चतुर्थोऽध्यायः–काव्यतत्त्वविमर्शात्मकोऽध्यायः । अस्मिन्नध्याये भागद्वयं वर्तते ।

श्रीमद्भागवते काव्यतत्त्वम् ।

काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च ।

श्रीमद्भागवते काव्यतत्त्वम् – अत्र काव्यशास्त्रस्य षड्सम्प्रदायानुसारि वर्णनं निबद्धम् । यथा श्रीमद्भागवते शब्दार्थविषयकवर्ननम्, रसविषयकवर्णनं, अलङ्कारविषयकवर्णनं, छन्दविषयकवर्णनं, गुणविषयकवर्णनं, दोषविषयकवर्णनम् अस्य ग्रन्थस्य भाषाशैली कथानकञ्च प्रतिपादितम ।

काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च – अस्मिन् प्रकरणे काव्यतत्त्वानां वैशिष्ट्यमुपयोगिता च सम्यक्तया प्रतिपादिता ।

पञ्चमोऽध्यायः –काव्यसमीक्षात्मकोऽध्यायः – अस्मिन्नध्याये भागद्वयं वर्तते ।

श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणम् ।

श्रीमद्भागवते काव्यतत्त्वानां समीक्षणम् ।

श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणम् – अस्मिन् प्रकरणे भागवतोक्तरसछन्दादिकाव्यतत्त्वानां विश्लेषणं कृतम् ।

श्रीमद्भागवते काव्यतत्त्वानां समीक्षणम् – अत्र श्रीमद्भागवते काव्यतत्त्वानां संमीक्षाविषये चर्चा वर्तते ।

पर्यन्ते चोपसंहारः सहायकग्रन्थानां सूची च वर्तते । अत्र प्रतिपादितस्य सम्पूर्णशोधप्रबन्धस्य सारतत्त्वं मयोपस्थापितम् ।

–––––––––––